# Mayaramabhattakrita Shri Hari Stuti

# મયારામભટ્ટકૃતા શ્રીહરિસ્તુતિઃ

## Document Information

Text title : Mayaramabhattakrita Shri Hari Stuti

File name : mayArAmabhaTTakRRitAshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Author : mayArAmabhaTTa

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# મયારામભટ્ટકૃતા શ્રીહરિસ્તુતિઃ

(વસન્તતિલકમ્)
તેજોમયે પરમધામનિ રાજમાનઃ
કન્દર્પકોટિકમનીયસુભદ્રરૂપઃ ।
યો નૈજમુક્તગણસેવિતપાદપદ્મસ્ત્વાં
ધર્મનન્દનમહં પ્રણમામિ નિત્યમ્ ॥ ૧॥

જેગીયમાનચરિતં શ્રુતિશાસ્ત્રવારૈઃ
સર્વેશ્વરં ચ પરિપૂર્ણવિબોધમાદ્યમ્ ।
બ્રહ્માણ્ડકોટિમનિશં પરિપાલયન્તં
ત્વાં ધર્મનન્દનમહં પ્રણમામિ નિત્યમ્ ॥ ૨॥

નૈકાત્મમુક્તિમનુચિન્તયમાનમીશં
નૈજેચ્છયા ક્ષિતિતલે ધૃતમર્ત્યનાટ્યમ્ ।
ભક્ત્યાત્મજં પરમવલ્લભવર્ણિવેષં
ત્વાં ધર્મનન્દનમહં પ્રણમામિ નિત્યમ્ ॥ ૩॥

મુક્તિપ્રદં સકલમઙ્ગલમઙ્ગલઞ્ચ
યોગીન્દ્રચિત્તવિનિવાસપદં પરેશમ્ ।
સંસારઘોરદુરિતાર્તિહરં મહેશં
ત્વાં ધર્મનન્દનમહં પ્રણમામિ નિત્યમ્ ॥ ૪॥

ધ્યાનં યદીયમમલં તનુતે પ્રકાશં
યદ્દર્શનં જનયતે પરમં પ્રભાવમ્ ।
યત્કીર્તનં કલયતે ચરમામ્પ્રશાન્તિં
ત્વાં ધર્મનન્દનમહં પ્રણમામિ નિત્યમ્ ॥ ૫॥

ભૂતં દદાતિ સતતં વચનામૃતૈર્યઃ
શિક્ષાં પ્રદાય નિયમૈર્વિતનોતિ ધર્મમ્ ।
લોકોત્તરસ્વચરિતૈઃ શમયત્યભદ્રં

ત્વાં ધર્મનન્દનમહં પ્રણમામિ નિત્યમ્ ॥ ૬॥

તોષ્યમાનગુણરાશિમમર્ત્યવૃન્દૈઃ
સર્વાત્મકં નિખિલકારણકારણઞ્ચ ।
શ્રીધીધૃતિપ્રગતિનીતિચિતિપ્રકાશં
ત્વાં ધર્મનન્દનમહં પ્રણમામિ નિત્યમ્ ॥ ૭॥

યન્નામ વર્તત ઇદા કલિકલ્મષઘ્નં
નૈરાશ્યકર્દમનિમગ્નપ્રતારકઞ્ચ ।
કલ્પદ્રુમોપમમઘૌઘહરપ્રભાવં
ત્વાં ધર્મનન્દનમહં પ્રણમામિ નિત્યમ્ ॥ ૮॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે તૃતીયપ્રવાહે
દ્વિચત્વારિંશત્તમે તરઙ્ગે મયારામભટ્ટકૃતા શ્રીહરિસ્તુતિઃ સમ્પૂર્ણા ।

---

*Mayaramabhattakrita Shri Hari Stuti*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*